# YoginihRidayam

# યોગિનીહૃદયમ્

## Document Information

Text title : yoginiihRidayam.h

File name : yoginii.itx

Category : hRidaya, devii, otherforms, devI, yoginI, kAshmIrashaivadarshanam, yogini

Location : doc_devii

Transliterated by : Michael Magee <ac70 at cityscape.co.uk>

Proofread by : Mike Magee <mike.magee@btinternet.com>

Description-comments : yoginiihRidayam

Latest update : October 7, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

YoginihRidayam

# યોગિનીહૃદયમ્

## અથ પ્રથમઃ પટલઃ

શ્રીદેવ્યુવાચ -
દેવદેવ મહાદેવ પરિપૂર્ણપ્રથામય ।
વામકેશ્વરતન્ત્રેઽસ્મિન્નજ્ઞાતર્થાસ્ત્વનેકશઃ ॥ ૧॥

તાંસ્તાનર્થાનશેષેણ વક્તુમર્હસિ ભૈરવ ।
શ્રીભૈરવ ઉવાચ
શ ृણુ દેવિ મહાગુહ્યં યોગિનિહૃદયં પરમ્ ॥ ૨॥

ત્વત્પ્રીત્યા કથયામ્યદ્ય ગોપનીયં વિશેષતઃ ।
કર્ણાત્કર્ણોપદેશેન સમ્પ્રાપ્તમવનીતલમ્ ॥ ૩॥

ન દેયં પરશિષ્યેભ્યો નાસ્તિકેભ્યો ન ચેશ્વરિ ।
ન શુશ્રૂષાલસાનાઞ્ચ નૈવાનર્થપ્રદાયિનામ્ ॥ ૪॥

પરીક્ષિતાય દાતવ્યં વત્સરાર્ધોષિતાય ચ ।
એતજ્જ્ઞાત્વા વરરોહે સદ્યઃ ખેચરતાં વ્રજેત્ ॥ ૫॥

ચક્રસઙ્કેતકો મન્ત્રપૂજાસઙ્કેતકૌ તથા ।
ત્રિવિધસ્ત્રિપુરાદેવ્યાઃ સઙ્કેતઃ પરમેશ્વરિ ॥ ૬॥

યાવદેતન્ન જાનાતિ સઙ્કેતત્રયમુત્તમમ્ ।
ન તાવત્રિપુરાચક્રે પરમાજ્ઞાધરો ભવેત્ ॥ ૭॥

તચ્છક્તિપઞ્ચકં સૃષ્ટ્યા લયેનાગ્નિચતુષ્ટયમ્ ।
પઞ્ચશક્તિચતુર્વહ્નિસંયોગાચ્ચક્રસમ્ભવઃ ॥ ૮॥

એતચ્ચક્રાવતારન્તુ કથયામિ તવાનઘે ।
યદા સા પરમા શક્તિઃ સ્વેચ્છયા વિશ્વરૂપિણી ॥ ૯॥

સ્ફુરત્તામાત્મનઃ પશ્યેત્તદા ચક્રસ્ય સમ્ભવઃ ।

શૂન્યાકારાદ્વિસર્ગાન્તાદ્ બિન્દોઃ પ્રસ્પન્દસંવિદઃ ॥ ૧૦॥

પ્રકાશપરમાર્થત્વાત્ સ્ફુરત્તાલહરીયુતાત્ ।
પ્રસૃતં વિશ્વલહરીસ્થાનં માતૃત્રયાત્મકમ્ ॥ ૧૧॥

બૈન્દવં ચક્રમેતસ્ય ત્રિરૂપત્વં પુનર્ભવેત્ ।
ધર્માધર્મૌ તથાત્માનો માતૃમેયૌ તથા પ્રમા ॥ ૧૨॥

નવયોન્યાત્મકં ચક્રં ચિદાનન્દઘનં મહત્ ।
ચક્રં નવાત્મકમિદં નવધા ભિન્નમન્ત્રકમ્ ॥ ૧૩॥

બૈન્દવાસનસંરૂઢસંવર્તાનલચિત્કલમ્ ।
અમ્બિકારૂપમેવેદમષ્ટારસ્થં સ્વરાવૃતમ્ ॥ ૧૪॥

નવત્રિકોણસ્ફુરિતપ્રભારૂપદશારકમ્ ।
શક્ત્યાદિનવપર્યન્તદશાર્ણસ્ફૂર્તિકારકમ્ ॥ ૧૫॥

ભૂતતન્માત્રદશકપ્રકાશાલમ્બનત્વતઃ ।
દ્વિદશારસ્ફુરદ્રૂપં ક્રોધીશાદિદશારકમ્ ॥ ૧૬॥

ચતુશ્ચક્રપ્રભારૂપસંયુક્તપરિણામતઃ ।
ચતુર્દશારરૂપેણ સંવિત્તિકરણાત્મના ॥ ૧૭॥

ખેચર્યાદિજયાન્તાર્ણપરમાર્થપ્રથામયમ્ ।
એવં શક્ત્યનલાકારસ્ફુરદ્રૌદ્રીપ્રભામયમ્ ॥ ૧૮॥

જ્યેષ્ટારૂપચતુષ્કોણં વામારૂપભ્રમિત્રયમ્ ।
ચિદંશાન્તસ્ત્રિકોણં ચ શાન્ત્યતિતાષ્ટકોણકમ્ ॥ ૧૯॥

શાન્ત્યંશદ્વિદશારઞ્ચ તથૈવ ભુવનારકમ્ ।
વિદ્યાકલાપ્રમારૂપદલાષ્ટકસમાવૃતમ્ ॥ ૨૦॥

પ્રતિષ્ટાવપુષા સૃષ્ટસ્ફુરદ્વ્યષ્ટદલામ્બુજમ્ ।
નિવૃત્ત્યાકારવિલસચ્ચતુસ્કોણવિરાજિતમ્ ॥ ૨૧॥

ત્રૈલોક્યમોહનાદ્યે તુ નવચક્રે સુરેશ્વરિ ।
નાદો બિન્દુઃ કલા જ્યેષ્ટા રૌદ્રીઈ વામા તથા પુનઃ ॥ ૨૨॥

વિષઘ્નીઈ દૂતરી ચૈવ સર્વાનન્દા ક્રમાત્ સ્થિતાઃ ।
નિરંશૌ નાદબિન્દૂ ચ કલા ચેચ્છાસ્વરૂપકમ્ ॥ ૨૩॥

જ્યેષ્ટા જ્ઞાનં ક્રિયા શેષમિત્યેવં ત્રિતયાત્મકમ્ ।
ચક્રં કામકલારૂપં પ્રસારપર,માર્થતઃ ॥ ૨૪॥

અકુલે વિષુસંજ્ઞે ચ શક્તે વહ્નૌ તથા પુનઃ ।
નાભાવનાહતે શુદ્ધે લમ્બિકાગ્રે ભ્રુવોઽન્તરે ॥ ૨૫॥

બિન્દૌ તદર્ધે રોધિન્યાં નાદે નાદાન્ત એવ ચ ।
શક્તૌ પુનર્વ્યાપિકાયાં સમનોન્મનિ ગોચરે ॥ ૨૬॥

મહાબિન્દૌ પુનશ્ચૈવ ત્રિધા ચક્રં તુ ભાવયેત્ ।
આજ્ઞાન્તં સકલં પ્રોક્તં તતઃ સકલનિષ્કલમ્ ॥ ૨૭॥

ઉન્મન્યન્તં પરે સ્થાને નિષ્કલઞ્ચ ત્રિધા સ્થિતમ્ ।
દીપાકારોઽર્ધમાત્રશ્ચ લલાટે વૃત્ત્ ઇષ્યતે ॥ ૨૮॥

અર્ધચન્દ્રસ્તથાકારઃ પાદમાત્રસ્તદૂર્ધ્વકે ।
જ્યોત્સ્નાકારા તદષ્ટાંશા રોધિની ત્ર્યસ્રવિગ્રહા ॥ ૨૯॥

બિન્દુદ્વયાન્તરે દણ્ડઃ શેવરૂપો મણિપ્રભઃ ।
કલાંશો દ્વિગુણાંશશ્ચ નાદાન્તો વિદ્યુદુજ્જ્વલઃ ॥ ૩૦॥

હલાકારસ્તુ સવ્યસ્થબિન્દુયુક્તો વિરાજતે ।
શક્તિર્વામસ્થબિન્દુધત્સ્થિરાકારા તથા પુનઃ ॥ ૩૧॥

વ્યાપિકા બિન્દુવિલસત્ત્રિકોણાકારતાં ગતા ।
બિન્દુદ્વયાન્તરાલસ્થા ઋજુરેખામયી પુનઃ ॥ ૩૨॥

સમના બિન્દુવિલસદૃજુરેખા તથોન્મના ।
શક્ત્યાદીનાં વપુઃ સ્ફૂર્જદ્દ્વાદશાદિત્યસન્નિભમ્ ॥ ૩૩॥

ચતુઃષષ્ટિસ્તદૂર્ધ્વં તુ દ્વિગુણં દિગુણં તતઃ ।
શક્ત્યાદીનાં તુ માત્રાંશો મનોન્મન્યાસ્તથોન્મની ॥ ૩૪॥

દેશકાલાનવચ્છિન્નં તદૂર્ધ્વે પરમં મહત્ ।
નિસર્ગસુન્દરં તત્તુ પરાનન્દવિઘૂર્ણિતમ્ ॥ ૩૫॥

આત્મનહ્ સ્ફુરણં પશ્યેદ્યદા સા પરમા કલા ।
અમ્બિકારૂપમાપન્ન પરા વાક્ સસુદીરિતા ॥ ૩૬॥

બીજભાવસ્થિતં વિશ્વં સ્ફુટીકર્તું યદોન્મુખી॥

વામા વિશ્વસ્ય વમનાદઙ્કુશાકારતાં ગતા ॥ ૩૭॥

ઇચ્છાશક્તિસ્તદા સેયં પશ્યન્તી વપુષા સ્થિતા ।
જ્ઞાનશક્તિસ્તથા જ્યેષ્ટા મધ્યમા વાગુદીરિતા ॥ ૩૮॥

ઋજુરેખામયી વિશ્વસ્થિતૌઇ પ્રથિતવિગ્રહા ।
તત્સંહૃતિદશાયાં તુ બૈન્દવં રૂપમાસ્થિતા ॥ ૩૯॥

પ્રત્યાવૃત્તિક્રમેણૈવં શૃઙ્ગટવપુરુજ્જ્વલા ।
ક્રિયાશક્તિસ્તુ રૌદ્રીયં વૈખરી વિશ્વવિગ્રહા ॥ ૪૦॥

ભાસનાદ્વિશ્વરૂપસ્ય સ્વરૂપે બાહ્યતોઽપિ ચ ।
એતાશ્ચતસ્ત્રઃ શક્ત્યસ્તુ કા પૂ જા ઓ ઇતિ ક્રમાત્ ॥ ૪૧॥

પીઠાઃ કન્દે પદે રૂપે રૂપાતીતે ક્રમાત્ સ્થિતાઃ ।
ચતુરસ્ત્રં તથ બિન્દુષટ્કયુક્તં ચ વૃત્તકમ્ ॥ ૪૨॥

અર્ધચન્દ્રં ત્રિકોણં ચ રૂપાણ્યેષાં ક્રમેણ તુ ।
પીતો ધૂમ્રસ્તથા શ્વેતો રક્તો રૂપં ચ કીર્તિતમ્ ॥ ૪૩॥

સ્વયમ્ભુર્બાણલિઙ્ગં ચ ઇતરં ચ પરં પુનઃ ।
પીઠેષ્વેતાનિ લિઙ્ગાનિ સંસ્થિતાનિ વરાનને ॥ ૪૪॥

હેમબન્ધૂકકુસુમશરચ્ચન્દ્રનિભાનિ તુ ।
સ્વાવૃતં ત્રિકૂટં ચ મહાલિઙ્ગં સ્વયમ્ભુવમ્ ॥ ૪૫॥

કાદિતાન્તા ક્ષરોપેતં બાણલિઙ્ગં ત્રિકોણકમ્ ।
કદમ્બગોલકાકારં થાદિસાન્તાક્ષરાવૃતમ્ ॥ ૪૬॥

સૂક્ષ્મરૂપં સમસ્તાર્ણવૃતં પરમલિઙ્ગકમ્ ।
બિન્દુરૂપં પરાનન્દકન્દં નિત્યપઓદિતમ્ ॥ ૪૭
બીઅત્રિતયયુક્તાસ્ય સકસ્ય મનોઃ પુનઃ ।
એતાનિ વાચ્યરૂપાણિ કુલકૌલમયાનિ તુ ॥ ૪૮॥

જાગ્રત્સ્વપ્નસુષુપ્ત્યાખ્યતુર્યરૂપાણ્યમૂનિ તુ ।
અતિતં તુ પરં તેજઃ સ્વસંવિદુદયાત્મકમ્ ॥ ૪૯॥

સ્વેચ્છાવિશ્વમયોલ્લેખખચિતં વિશ્વરૂપકમ્ ।
ચૈતન્યમાત્મનો રૂપં નિસર્ગાનન્દસુન્દરમ્ ॥ ૫૦॥

મેયમાતૃપ્રમામાનપ્રસરૈઃ સંકુચત્પ્રભમ્ ।

શ‌ૃઙ્ગાટરૂપમાપન્નમિચ્છાજ્ઞાનક્રિયાત્મકમ્ ॥ ૫૧॥

વિશ્વાકારપ્રથાધારનિજરૂપશિવાશ્રયમ્ ।
કામેશ્વરાઙ્કપર્યઙ્કનિવિષ્ટમતિસુન્દરમ્ ॥ ૫૨॥

ઇચ્છાશક્તિમયં પાશમઙ્કુશં જ્ઞાનરૂપિણમ્ ।
ક્રિયાશક્તિમયે બાણધનુષી દધદુજ્જ્વલમ્ ॥ ૫૩॥

આશ્રયાશ્રયિભેદેન અષ્ટધા ભિન્નહેતિમત્ ।
અષ્ટારચક્રસંરૂઢં નવચક્રાસનસ્થિતમ્ ॥ ૫૪॥

એવંરૂપં પરં તેજઃ શ્રીચક્રવપુષા સ્થિતમ્ ।
તદીયશક્તિનિકરસ્ફુરદૂર્મિસમાવૃતમ્ ॥ ૫૫॥

ચિદાત્મભિત્તૌ વિશ્વસ્ય પ્રકાશામર્શને યદા ।
કરોતિ સ્વેચ્છયા પૂર્ણવિચિકીર્ષાસમન્વિતા ॥ ૫૬॥

ક્રિયાશક્તિસ્તુ વિશ્વસ્ય મોદનાદ્ દ્રાવણાત્તથા ।
મુદ્રાખ્યા સા યદા સંવિદમ્બિકા ત્રિકલામયી ॥ ૫૭॥

ત્રિખણ્ડારૂપમાપન્ના સદા સન્નિધિકારિણી ।
સર્વસ્ય ચક્રરાજસ્ય વ્યાપિકા પરિકીર્તિત ॥ ૫૮॥

યોનિપ્રાચુર્યતઃ સૈષા સર્વસંક્ષોભિકા પુનઃ ।
વામાશક્તિપ્રધાનેયં દ્વારચક્રે સ્થિતા ભવેત્ ॥ ૫૯॥

ક્ષુબ્ધાવિશ્વસ્થિતતિર્કરી જ્યેષ્ટાપ્રાચુર્યમાશ્રિતા ।
સ્થૂલનાદકલારૂપા સર્વાનુગ્રહકારિણી ॥ ૬૦॥

સર્વાશપૂરણાખ્યે તુ સૈષા સ્ફુરિતવિગ્રહા ।
જ્યેષ્ટાવામાસમન્ત્વેન સૃષ્ટેઃ પ્રાધાન્યમાશ્રિતા ॥ ૬૧॥

આકર્ષિણી તુ મુદ્રેયં સર્વસંક્ષોભિણી સ્મૃતા ।
વ્યોમદ્વયાન્તરાલસ્થબિન્દુરૂપા મહેશ્વરિ ॥ ૬૨॥

શિવશક્ત્યાત્મસંશ્લેષાદ્વિવ્યાકેશકરી સ્મૃતા ।
ચતુર્દશારચક્રસ્થા સંવિદાનન્દવિગ્રહા ॥ ૬૩॥

બિન્દ્વન્તરાલવિલસત્સૂક્ષ્મ રેખાશિખામયી ।
જ્યેષ્ટાશક્તિપ્રધાના તુ સર્વોન્માદનકારિણી ॥ ૬૪॥

દશારચક્રમાસ્થાય સંસ્થિતા વીરવન્દિતે ।
વામાશક્તિપ્રધાના તુ મહાઙ્કુશમયી પુનઃ ॥ ૬૫॥

તદ્વદ્વિશ્વં વમન્તી સા દિવ્તીયે તુ દશારકે ।
સંસ્થિતા મોદનપરા મુદ્રારૂપત્વમાસ્થિતા ॥ ૬૬॥

ધર્માધર્મસ્ય સંઘટ્ટાદુત્થિતા વિત્તીરૂપિણી ।
વિકલ્પોત્થક્રિયાલોપરૂપદોષવિધાતિની ॥ ૬૭॥

વિકલ્પરૂપરોગાણાં હારિણી ખેચરી પરા ।
સર્વરોગહરાખ્યે તુ ચક્રે સંવિન્મયી સ્થિતા ॥ ૬૮॥

શિવશક્તિસમાશ્લેષસ્ફુરદ્વ્યોમાન્તરે પુનઃ ।
પ્રકાશયતિ વિશ્વં સા સૂક્ષ્મરૂપસ્થિત સદા ॥ ૬૯॥

બીજરૂપા મહામુદ્રા સર્વસિદ્ધિમયે સ્થિતા ।
સમ્પૂર્ણસ્ય પ્રકાશસ્ય લાભભૂમિરિયં પુનઃ ॥ ૭૦॥

યોનિમુદ્રા કલારૂપા સર્વાનન્દમયે સ્થિતા ।
ક્રિયા ચૈતન્યરૂપત્વાદેવં ચક્રમયં સ્થિતમ્ ॥ ૭૧॥

ઇચ્છારૂપં પરં તેજાઃ સર્વદા ભાવયેદ્ બુધઃ ।
ત્રિધા ચ નવધા ચૈવ ચક્રસઙ્કેતકઃ પુનઃ ॥ ૭૨॥

વહ્નિનૈકેન શક્તિભ્યાં દ્વાભ્યાં ચૈકોઽપ્રઃ પુનઃ ।
તૈશ્ચ વહ્નિત્રયેણાપિ શક્તીનાં ત્રિતયેન ચ ॥ ૭૩॥

પદ્મદ્વયેન ચાન્યઃ સ્યાદ્ ભૂગૃહત્રિતયેન ચ ।
પઞ્ચશક્તિ ચતુર્વહ્નિપદ્મદ્વયમહીત્રયમ્ ॥ ૭૪॥

પરિપૂર્ણં મહચક્રં તત્પ્રકારઃ પ્રદર્શ્યતે ।
તત્રાદ્યં નવયોનિ સ્યાત્ તેન દ્વિદશાસંયુતમ્ ॥ ૭૫॥

મનુયોનિ પરં વિદ્યાત્ તૃતીયં તદનન્તરમ્ ।
અષ્ટદ્વ્યષ્ટદલોપેતં ચતુરસ્રત્રયાન્વિતમ્ ॥ ૭૬॥

ચક્રસ્ય ત્રિપ્રકારત્વં કથિતં પરમેશ્વરિ ।
સૃષ્ટિઃસ્યાન્નવયોન્યાદિપૃથ્વ્યન્તં સંહૃતિ પુનઃ ॥ ૭૭॥

પૃથ્વ્યાદિનવયોન્યન્તમિતિ શાસ્ત્રસ્ય નિર્ણયઃ ।
એતત્સમષ્ટિરૂપં તુ ત્રિપુરાચક્રમુચ્યતે ॥ ૭૮॥

યસ્ય વિજ્ઞાનમાત્રેણ ત્રિપુરાજ્ઞાનવાન્ ભવેત્ ।
ચક્રસ્ય નવધાત્વં ચ કથયામિ તવ પ્રિયે ॥ ૭૯॥

આદિમં ભૂત્રયેણ સ્યાદ્ દ્વિતીયં ષોડશારકમ્ ।
અન્યદષ્ટદલં પ્રોક્તં મનુકોણમનન્તરમ્ ॥ ૮૦॥

પઞ્ચમં દશકોણં સ્યાત્ ષષ્ટં ચાપિ દશારકમ્ ।
સપ્તમં વસુકોણં સ્યાન્મધ્યત્ર્યસ્રમથાષ્ટમમ્ ॥ ૮૧॥

નવમં ત્ર્યસ્રમધ્યં સ્યાત્ તેષાં નામાન્યતઃ શ ૃણુ ।
ત્રૈલોક્યમોહનં ચક્રં સર્વાશાપરિપૂરકમ્ ॥ ૮૨॥

સર્વસંક્ષોભણં ગૌરિ સર્વાસૌભાગ્યદાયકમ્ ।
સર્વાર્થસાધકં ચક્રં સર્વરક્ષાકરં પરમ્ ॥ ૮૩॥

સર્વરોગહરં દેવિ સર્વસિદ્ધિમયં તથા ।
સર્વાનન્દમયં ચાપિ નવમં શ ૃણુ સુન્દરિ ॥ ૮૪॥

અત્ર પુજ્યા મહાદેવી મહાત્રિપુરસુન્દરી ।
પરિપૂર્ણં મહાચક્રમજરામરકારકમ્ ॥ ૮૫॥

એતમેવ મહાચક્રસઙ્કેતઃ પરમેશ્વરિ ।
કથિતસ્ત્રિપુરાદેવ્યા જીવન્મુક્તિપ્રવર્તકઃ ॥ ૮૬॥

ઇતિ પ્રથમઃ પટલઃ સમાપ્તઃ ।

## અથ દ્વિતીયઃ પટલઃ

મન્ત્રસઙ્કેતં દિવ્યમધુના કથ્યામિ તે ।
યદ્વેત્તા ત્રિપુરાકારો વિરચક્રેશ્વરો ભવેત્ ॥ ૧॥

કરશુદ્ધિકરો ત્વાદ્યા દ્વિતીયા ચાત્મરક્ષિકા ।
આત્માસનગતા દેવી તૃતીયા તદનન્તરમ્ ॥ ૨॥

ચક્રાસનગતા પશ્ચાત્ સર્વમન્ત્રાસનસ્થિતા ।
સાધ્યસિદ્ધાસના ષ્ટા માયાલક્ષ્મીમયી પરા ॥ ૩॥

મૂર્તિવિદ્યા ચ સા દેવી સપ્તમો પરિકીર્તિતા ।
અષ્ટમ્યાવાહિની વિદ્યા નવમા ભૈરવી પરા ॥ ૪॥

મૂલવિદ્યા તથા ખ્યાતા ત્રૈલોક્યવશકારિણી ।
એવં નવપ્રકારાસ્તુ પૂજાકાલે પ્રયત્નતઃ ॥ ૫॥

એતાઃ ક્રમેણ ન્યસ્તવ્યાઃ સાધકેન કુલેશ્વરિ ।
પાદાગ્રજઙ્ઘાજાનૂરુગુદલિઙ્ગાગ્રકેષુ ચ ॥ ૬॥

આધરે વિન્યસન્મૂર્તિ તસ્યામાવાહિનીં ન્યસેત્ ।
મૂલેન વ્યાપકન્યાસઃ કર્તવ્યઃ પરેમ્શ્વરિ ॥ ૭॥

અકુલાદિષુ પૂર્બોક્તસ્થાનેષુ પરિચિન્તયેત્ ।
ચક્રેશ્વરિસમાયુક્તં નવચક્રં પુરોદિતમ્ ॥ ૮॥

તાસાં નામાનિ વક્ષ્યામિ યથાનુક્રમયોગતઃ ।
તત્રાદ્યા ત્રિપુરા દેવી દ્વિતીયા ત્રિપુરેશ્વરી ॥ ૯॥

તૃતીયા ચ તથા પ્રોક્તા દેવી ત્રિપુરસુન્દરી ।
ચતુર્થી ચ મહાદેવી દેવી ત્રિપુરવાસિની ॥ ૧૦॥

પઞ્ચમી ત્રિપુરા શ્રીઃ સ્યાત્ ષષ્ટી ત્રિપુરમાલિની ।
સપ્તમી ત્રિપુરા સિદ્ધિરષ્ટમી ત્રિપુરામ્બિકા ॥ ૧૧॥

નવમી તુ માહદેવી મહાત્રિપુરસુન્દરી ।
પૂજયેચ્ચ ક્રમાદેતા નવચક્રે પુરોદિતે ॥ ૧૨॥

એવં નવપ્રકારાદ્યા પુજાકલે તુ પાર્વતિ ।
એકાકારા હ્યાદ્યશક્તિરજરામરકારિણી ॥ ૧૩॥

મન્ત્રસઙ્કેતકસ્તસ્યા નાનાકારો વ્યવસ્થિતઃ ।
નાનામન્ત્રકર્મેણૈવ પારમ્પર્યેણ લભ્યતે ॥ ૧૪॥

ષડવિધસ્તં તુ દેવેશિ કથયામિ તવાનઘે ।
ભાવાર્થઃ સમ્પ્રદાયાર્થો નિગમાર્થશ્ચ કૌલિકઃ ॥ ૧૫॥

તથા સર્વરહસ્યાર્થો મહાતત્ત્વાર્થ એવ ચ ।
અક્ષરાર્થો હિ ભાવાર્થઃ કેવલઃ પરમેશ્વરિ ॥ ૧૬॥

યોગિનીભિસ્તથા વિરૈર્વીરેન્દ્રાઇઃ સર્વદા પ્રિયે ।
શિવશક્તિસમાયોગાऽજ્જનિતો મન્ત્રરાજકઃ ॥ ૧૭॥

તન્મયીં પરમાનન્દનન્દિતાં સ્પન્દરૂપિણીમ્ ।
નિસર્ગસુન્દરીં દેવીં જ્ઞાત્વા સ્વૈરમુપાસતે ॥ ૧૮॥

શિવશક્ત્યાત્મસંઘટ્ટરૂપે બ્રહ્મણિ શાશ્વતે ।
તત્પ્રથાપ્રસરાશ્લેષભુવિ ત્વૈન્દ્રોપલક્ષિતે ॥ ૧૯॥

જ્ઞાતૃજ્ઞાનમયાકારસનનાન્મન્ત્રરૂપિણી ।
તેષાં સમષ્ટિરૂપેણ પરાશક્તિસ્તુ માતૃકા ॥ ૨૦॥

મધ્યબિન્દુવિસર્ગાન્તઃ સમાસ્થાનમયે પરે ।
કુટિલારૂપકે તસ્યાઃ પ્રતિરૂપે વિયત્કલે ॥ ૨૧॥

મધ્યપ્રાણપ્રથારૂપપસ્પન્દવ્યોમ્નિ સ્થિત પુનઃ ।
મધ્યમે મન્ત્રપિણ્ડે તુ તૃતીયે પિણ્ડકે પુનઃ ॥ ૨૨॥

રાહુકૂટાદ્વયસ્ફૂર્જચ્ચલત્તાસંસ્થિતસ્ય તુ ।
ધર્માધર્મસ્ય વાચ્યસ્ય વિષામૃતમયસ્ય ચ ॥ ૨૩॥

વાચકાક્ષરસંયોગાત્ કથિતા વિશ્વરૂપિણી ।
તેષાં સમષ્ટિરૂપેણ પરાશક્તિં તુ માતૃકામ્ ॥ ૨૪॥

કૂટત્રયાત્મિકાં દેવીં સમષ્ટિવ્યષ્ટિરૂપિણિમ્ ।
આદ્યાં શક્તિં ભાવયન્તો ભાવાર્થમિતિ મન્વતે ॥ ૨૫॥

સમ્પ્રદાયો મહાબોધરૂપો ગુરુમુખે સ્થિતઃ ।
વિશ્વાકારપ્રથાયાસ્તુ મહત્ત્વઞ્ચ યદાશ્રયમ્ ॥ ૨૬॥

શિવશક્ત્યાદ્યયા મૂલવિદ્યયા પરમેશ્વરિ ।
જગત્કૃત્સ્નં તયા વ્યાપ્તં શ઼ૃણુષ્વાવહિતા પ્રિયે ॥ ૨૭॥

પઞ્ચભૂતમયં વિશ્વં તન્મયી સા સદાનઘે ।
તન્મયી મૂલવિદ્યા ચ તદદ્ય કથયામ્મિ તે ॥ ૨૮॥

હકારાદ્ વ્યોમ સમ્ભૂતં કકારાત્તુ પ્રભઞ્જનહ્ ।
રેફાદગ્નિઃ સકારાચ્ચ જલતત્ત્વસ્ય સમ્ભવઃ ॥ ૨૯॥

લકારાત્,હ્ પૃથિવી જાતા તસ્માદ્ વિશ્વમયી ચ સા ।
ગુણાઃપઞ્ચદશ પ્રોક્તા ભૂતાનં તન્મયી શિવા ॥ ૩૦॥

યસ્ય યસ્ય પદાર્થસ્ય સા યા શક્તિરુદીરિતા ।
સા સા સર્વેશ્વરી દેવી સ સ સર્વો મહેશ્વરઃ ॥ ૩૧॥

વ્યાપ્તા પઞ્ચદશાર્ણઃ સા વિદ્યા ભૂતગુણાત્મિકાઃ ।

પઞ્ચભિશ્ચ તથા ષડ્ ભિશ્ચતુર્ભિરપિ ચાક્ષરઃ ॥ ૩૨॥

સ્વરવ્યઞ્જનભેદેન સપ્તત્રિંશત્પ્રભેદેની ।
સપ્તત્રિંશત્પ્રભેદેન ષટ્ ત્રિંશતત્ત્વરૂપિણી ॥ ૩૩॥

તત્ત્વાતીતસ્વભાવા ચ વિદ્યૈષં ભાવ્યતે સદા ।
પૃથિવ્યાદિષુ ભૂતેષુ વ્યાપકં ચોત્તરોત્તરમ્ ॥ ૩૪॥

ભૂતં ત્વધસ્તનં વ્યાપ્યં તદ્ ગુણા વ્યાપકાશ્રયાઃ ।
વ્યાપ્યેષ્વવસ્થિતા દેવિ સ્થૂલસૂક્ષ્મવિભેદતઃ ॥ ૩૫॥

તસ્માદ્વ્યોમગુણઃ શબ્દો વાય્વાદીન્ વ્યાપ્ય સંસ્થિતઃ ।
વ્યોમબિહૈસ્તુ વિદ્યાસ્થૈર્લક્ષયેચ્છબ્દપઞ્ચકમ્ ॥ ૩૬॥

તેષાં કારુણરૂપેણ સ્થિત ધ્વનિમયં પરમ્ ।
ભવેદ્ ગુણવતાં બીજં ગુણાનામપિ વાચકમ્ ॥ ૩૭॥

કાર્યકારણભાવેન તયોરૈક્ય વિવક્ષયા ।
મહામાયાત્રયેણાપિ કારણેન ચ બિન્દુના ॥ ૩૮॥

વાય્વાગ્નિજલભૂમીનાં સ્પર્શાનાં ચ ચતુષ્ટયમ્ ।
ઉત્પન્નં ભાવયેદ્ દેવિ સ્થૂલસૂક્ષ્મવિભેદતઃ ॥ ૩૯॥

રૂપાણાં ત્રિતયં તદ્વત્ ત્રિભી રેફૈર્વિભાવિતમ્ ।
પ્રધાનં તેજસો રૂપં તદ્ બીજેન હિ જન્યતે ॥ ૪૦॥

વિદ્યાસ્થૈશ્ચન્દ્રબીજૈસ્તુ સ્થૂલસૂક્ષ્મો રસઃ સ્મૃતઃ ।
સમ્બન્ધો વિદિતો લોકે રસસ્યાપ્યમૃતસ્ય ચ ॥ ૪૧॥

વસુ ધાયા ગુણો ગન્ધસ્તલ્લિપિર્ગન્ધવાચિકા ।
ભુવનત્રયસમ્ભન્ધાત્ ત્રિધાત્વં તુ મહેશ્વરિ ॥ ૪૨॥

અશુદ્ધશુદ્ધમિશ્રાણાં પ્રમાતૃણાં પરં વપુઃ ।
ક્રોધીશત્રિતયે નાથ વિદ્યાસ્થેન પ્રકાશ્યતે ॥ ૪૩॥

શ્રીકણ્ઠદશકં તદ્વદ વ્યક્તસ્યાપિ વાચકઃ ।
પ્રાણરૂપસ્થિતો દેવિ તદ્વદેકાદશઃ પરઃ ॥ ૪૪॥

એકઃ સન્નેવ પુરુષો બહુધા કાયતે હિ સઃ ।
રુદ્રેશ્વરસદેશાખ્યા દેવતા મિતવિગ્રહાઃ ॥ ૪૫॥

બિન્દુત્રયેણ કથિતા અમિતામિતવિગ્રહાઃ ।
શાન્તિઃ શક્તિશ્ચ શમ્ભુશ્ચ નાદત્રિતયબોધનાઃ ॥ ૪૬॥

વાગુરામૂલવલયે સૂત્રાદ્યાઃ કવલીકૃતાઃ ।
તથા મન્ત્રાઃ સમસ્તાશ્ચ વિદ્યાયામત્ર સંસ્થિતાઃ ॥ ૪૭॥

ગુરુક્રમેણ સમ્પ્રાપ્તઃ સમ્પ્રદાયાર્થ ઈરિતઃ ।
નિગર્ભાર્થો મહદેવિ શિવગુર્વાત્મગોચરઃ ॥ ૪૮॥

શિવગુર્વાત્મનામૈક્યાનુસંધાનાત્તદાત્મકમ્ ॥ ૪૯॥

નિષ્કલત્વં શિવે બુધ્વા તદ્રૂપત્વં ગુરોરપિ ।
તન્નિરીક્ષણસામર્થ્યાદાત્મનશ્ચ શિવાત્મતામ્ ॥ ૫૦॥

ભાવયેદભક્તિનમ્રઃ સઙ્કોચોન્મેષાકલઙ્કિતઃ ।
કૌલિકં કથયિષ્યામિ ચક્રદેવતયોરપિ ॥ ૫૧॥

વિદ્યાગુર્વાત્મનામૈક્યં તત્પ્રકારઃ પ્રદર્શ્યતે ।
લકારૈશ્ચતુરસ્રાણિ વૃત્તત્રિતયસંયુતમ્ ॥ ૫૨॥

સરોરુહદ્વયં શક્તૈરગ્નીષોમાત્મકં પ્રિયે ।
હૃલ્લેખાત્રયસંભૂતૈરક્ષરૈર્નવસઙ્ખ્યકૈઃ ॥ ૫૩॥

બિન્દુત્રયયુતૈર્જાતં નવયોન્યાત્મકં પ્રિયે ।
મણ્ડલત્રયયુક્તં તુ ચક્રં શક્ત્યનલાત્મકમ્ ॥ ૫૪॥

વ્યોમબીજત્રયેણૈવ પ્રમાતૃત્રિત્યાન્વિતમ્ ।
ઇચ્છાજ્ઞાનક્રિયારૂપમાદનત્રયસંયુતમ્ ॥ ૫૫॥

સદાશિવાસનં દેવિ મહાબિન્દુમયં પરમ્ ।
ઇત્થં મન્ત્રાત્મકં ચક્રં દેવતાયાઃ પરં વપુઃ ॥ ૫૬॥

એકાદશાધિકશતદેવતાત્મતયા પુનઃ ।
ગણેશત્વં મહાદેવ્યાઃ સસોમરવિપાવકૈઃ ॥ ૫૭॥

ઇચ્છાજ્ઞાનક્રિયાભિશ્ચ ગુણત્રયયુતૈહ્ પુનઃ ।
ગ્રહરૂપા ચ સા દેવી જ્ઞાનકર્મેન્દ્રિયૈરપિ ॥ ૫૮॥

તદર્થૈરેવ દેવેશિ કરણૈરાન્તરૈઃ પુનઃ ।
પ્રકૃત્યા ચ ગુણેનાપિ પુંસ્ત્વબન્ધેન ચાત્મના ॥ ૫૯॥

નક્ષત્રવિગ્રહા જાતા યોગિનીત્વમથોચ્યતે ।
ત્વગાદિધાતુનાથાભિર્ડાકિન્યાદિભિરપ્યસૌ ॥ ૬૦॥

વર્ગાષ્ટકનિવિષ્ટાભિર્યોગિનીભિશ્ચ સંયુતા ।
યોગિનીરૂપમાસ્થાય રાજતે વિશ્વવિગ્રા ॥ ૬૧॥

પ્રાણાપાનૌ સમાનશ્ચોદનવ્યાનૌ તથા પુનઃ ।
નાગઃ કૂર્મોઽથ કૃકરો દેવદત્તો ધનઞ્જયઃ ॥ ૬૨॥

જીવાત્મા પર્માત્મા ચૈત્યેતૈ રાશિસ્વરૂપિણી ।
અકથાદિત્રિપઙ્ક્ત્યાત્મા તાર્તિયાદિક્રમેણ સા ॥ ૬૩॥

ગણેશોઽભૂન્મહાવિદ્યા પરાવાગાદિવાઙ્મયી ।
બીજબિન્દુધ્વનીનાં ચ ત્રિકૂટેષુ ગ્રહાત્મિકા ॥ ૬૪॥

હૃલ્લેખાત્રયસંભૂતૈસ્તિથિસંખ્યૈસ્તથાક્ષરૈઃ ।
અન્યૈર્દ્વાદશભિર્વર્ણૈરેષા નક્ષત્રરૂપિણી ॥ ૬૫॥

વિદ્યાનન્તર્ભૂતશક્ત્યાદ્યૈઃ શાક્તૈઃ ષડ્ ભિસ્તથાક્ષરૈઃ ।
યોગિનીત્વં ચ વિધાય રાશિત્વં ચાન્ત્યવર્જિતૈઃ ॥ ૬૬॥

એવં વિશ્વપ્રકારા ચ ચક્ર રૂપા મહેશ્વરી ।
દેવ્યા દેહે યથા પ્રોક્તો ગુરુદેહે તથૈવ હિ ॥ ૬૭॥

તત્પ્રસાદાચ્ચ શિષ્યોઽપિ તદ્રૂપઃ સમ્પ્રજાયતે ।
ઇત્યેવં કૌલિકાર્થસ્તુ કથિતો વિરવન્દિતે ॥ ૬૮॥

તથા સર્વરહ્સ્યાર્થં કથયામિ તવાનઘે ।
મૂલાધારે તડિદ્રૂપે વાગ્ભવાકારતાં ગતે ॥ ૬૯॥

અષ્ટાત્રિંશત્કલાયુક્તપઞ્ચાશદ્વર્ણવિગ્રહા ।
વિદ્યા કુણ્ડલિનીરૂપા મણ્દલત્રયભેદિની ॥ ૭૦॥

તડિત્કોટિનિભપ્રખ્યા બિસતન્તુનિભાકૃતિઃ ।
વ્યોમેન્દુમણ્ડલાસક્તા સુધાસ્ત્રોતઃસ્વરૂપિણી ॥ ૭૧॥

સદા વ્યાપ્તજગત્ કૃત્સ્ના સદાનન્દસ્વરૂપિણી ।
એષા સ્વાત્મેતિ બુદ્ધિસ્તુ રહસ્યાર્થો મહેશ્વરિ ॥ ૭૨॥

મહાતત્ત્વાર્થં ઇતિ યત્તચ દેવિ વદામિ તે ।
નિષ્કલે પ્રમે સૂક્ષ્મે નિર્લક્ષ્યે ભાવવર્જિતે ॥ ૭૩॥

વ્યોમાતીતે પરે તત્ત્વે પ્રકાશાનન્દવિગ્રહે ।
વિશ્વોત્તિર્ણે વિશ્વમયે તત્ત્વે સ્વાત્મનિયોજનમ્ ॥ ૭૪॥

તદા પ્રકાશમાનત્વં તેજસાં તમસામપિ ।
અવિનાભાવરૂપત્વં તસ્માદ્વિશ્વસ્ય સર્વતઃ ॥ ૭૫॥

પ્રકાશતે મહાતત્ત્વં દિવ્યક્રીડારસોજ્જ્વલે ।
નિરસ્તસર્વસંકલ્પવિકલ્પસ્થિતિપૂર્વકઃ ॥ ૭૬॥

રહસ્યાર્થો મયા ગુપ્તઃ સદ્યઃ પ્રત્યયકારકઃ ।
મહાજ્ઞાનાર્ણવે દૃષ્ટઃ શઙ્કા તત્ર ન પાર્વતિ ॥ ૭૭॥

વિદ્યાપીઠનિબદ્ધેષુ સંસ્થિતો દિવ્યસિદ્ધિદઃ ।
કૌલાચારપરૈર્દેવિ પાદુકાભાવનાપરૈઃ ॥ ૭૮॥

યોગિનીમેલનોદ્યુક્તૈઃ પ્રાપ્તવિદ્યાભિષેચનૈઃ ।
શઙ્કાકલઙ્કવિગતૈઃ સદા મુદિતમાનસૈઃ ॥ ૭૯॥

પારમ્પર્યેણ વિજ્ઞાતરહસ્યાર્થવિશારદૈઃ ।
લભ્યતે નાન્યથ દેવિ ત્વાં શપેકુલસુન્દરિ ॥ ૮૦॥

પારમ્પર્યવિહીના યે જ્ઞાનમાત્રેણ ગર્વિતાઃ ।
તેષાં સમયલોપેન વિકુર્વન્તિ મરીચયઃ ॥ ૮૧॥

યસ્તુ દિવ્યરસાસ્વાદમોદમાનવિમર્શનઃ ।
દેઅતાતિથિનક્ષત્રે વારેઽપિ ચ વિવસ્વતઃ ॥ ૮૨॥

મરીચીન્ પ્રીણયત્યેવ મદિરાનન્દઘૂર્ણિતઃ ।
સર્વદા ચ વિશેષણ લભતે પૂર્ણબોધતામ્ ॥ ૮૩॥

એવંવ્હાવસ્તુ દેવેશિ દેશિકેન્દ્રપ્રસાદતઃ ।
મહાજ્ઞાનમયો દેવિ સદ્યઃ સમ્પ્રાપ્યતે નરૈઃ ॥ ૮૪॥

એવમેતત્પ્રદં જ્ઞાનં વિદ્યાર્ણાગમગોચરમ્ ।
દેવિ ગુહ્યપ્રિયેણૈવ વ્યાખ્યાતં દુર્ગિ ષડ્ વિધમ્ ।
સદ્યો યસ્ય પ્રબોધેન વીરચક્રેશ્વરો ભવેત્ ॥ ૮૫॥

ઇતિ દ્વિતીયઃ પટલઃ સમાપ્તઃ ।

## અથ તૃતાયઃ પટલઃ

પૂજાસઙ્કેતમધુના કથયામિ તવાનઘે ।
યસ્ય પ્રબોધમાત્રેણ જિવન્મુક્તઃ પ્રમોદતે ॥ ૧॥

તવ નિત્યોદિતા પૂજા ત્રિભિર્ભેદૈર્વ્યવસ્થિતા ।
પરા ચાપ્યપર ગૌરિ તૃતીયા ચ પરાપરા ॥ ૨॥

પ્રથમાદ્વૈતભાવસ્થા સર્વપ્રસરગોચરા ।
દ્વિતીયા ચક્રપૂજા ચ સદા નિષ્પાદ્યતે મયા ॥ ૩॥

એવં જ્ઞાનમયે દેવિ તૃતીયા તુ પરાપરા ।
ઉત્તમા સા પરા જ્ઞેયા વિધાનં શ◌ૃણુ સામ્પ્રતમ્ ॥ ૪॥

મહાપદ્મવનાન્તસ્થે વાગ્ભવે ગુરુપાદુકામ્ ।
આપ્યાયિતજગદ્રૂપાં પર્મામૃતવર્ષિણીમ્ ॥ ૫॥

સઞ્ચિન્ત્ય પરમાદ્વૈતભાવનામૃતઘૂર્ણિતઃ ।
દહરાન્તરસંસર્પન્નાદાલોકનતત્પરઃ ॥ ૬॥

વિકલ્પરૂપસંજલ્પવિમુખોऽન્તર્મુખઃ સદા ।
ચિત્કલોલ્લાસદલિતસંકોચસ્ત્વતિસુન્દરઃ ।
ઇન્દ્રિયપ્રીણનદ્રવ્યૈર્વિં હિતસ્વાત્મપૂજનઃ ॥ ૭॥

ન્યાસં નિર્વર્તયેદ્દેહે ષોઢાન્યાસપુરઃસરમ્ ।
ગણેશૈઃ પ્રથમો ન્યાસો દ્વિતીતસ્તુ ગ્રહૈર્મતઃ ॥ ૮॥

નક્ષત્રૈશ્ચ તૃતીયઃ સ્યાદ્યોગિનીભિશ્ચતુર્થકઃ ।
રાશિભિઃ પઞ્ચમો ન્યાસઃ ષષ્ઠઃ પીઠૈર્નિગદ્યતે ॥ ૯॥

ષોઢાન્યાસસ્ત્વયં પ્રોક્તઃ સર્વત્રૈવાપરાજિતઃ ।
એવં યો ન્યસ્તગાત્રસ્તુ સ પૂજ્યઃ સર્વયોગિભિઃ ॥ ૧૦॥

નાસ્ત્યસ્ય પૂજ્યો લોકેષુ પિતૃમાતૃમુખો જનઃ ।
સ એવ પૂજ્યઃ સર્વેષાં સ સ્વયં પરમેશ્વરઃ ॥ ૧૧॥

ષોઢાન્યાસવિહીનં યં પ્રણમેદ્દેષ પાર્વતિ ।
સોऽચિરાન્મૃત્યુમાપ્નોતિ નરકં ચ પ્રપદ્યતે ॥ ૧૨॥

ષોઢાન્યાસપ્રકારં ચ કથયામિ તવાનઘે ।
વિઘ્નેશો વિઘ્નરાજશ્ચ વિનાયકશિવોત્તમૌ ॥ ૧૩॥

વિઘ્નકૃદ્વિઘ્નહર્તા ચ ગણરાટ્ ગણનાયકઃ ।
એકદન્તો દ્વિદન્તશ્ચ ગજવક્ત્રો નિરઞ્જનઃ ॥ ૧૪॥

કપર્દવાન્ દીર્ઘમુખઃ શઙ્કુકર્ણો વૃષધ્વજઃ ।
ગણનાથો ગજેન્દ્રશ્ચ શુર્પકર્ણસ્ત્રિલોચનઃ ॥ ૧૫॥

લમ્બોદરો મહાનાદશ્ચતુર્મૂર્તિઃ સદાશિવઃ ।
આમોદો દુર્મુખશ્ચૈવ સુમુખશ્ચ પ્રમોદકઃ ॥ ૧૬॥

એકપાદો દ્વિજિહ્વશ્ચ શૂરો વીરશ્ચ ષણ્મુખઃ ।
વરદો વામદેવશ્ચ વક્રતુણ્ડો દ્વિરણ્ડકઃ ॥ ૧૭॥

સેનાનીર્ગ્રામણીર્મત્તો વિમત્તો મત્તવાહનઃ ।
જટી મુણ્ડી તથા ખડ્ગી વરેણ્યો વૃષકેતનઃ ॥ ૧૮॥

ભક્ષ્યપ્રિયો ગણેશશ્ચ મેઘનાદો ગણેશ્વરઃ ।
તરુણારુણસઙ્કાશાન્ ગજવક્ત્રાન્ ત્રિલોચનાન્ ॥ ૧૯॥

પાશાઙ્કુશવરાભીતિહસ્તાન્ શક્તિસમન્વિતાન્ ।
એતાંસ્તુ વિન્યસેદ્દેહે માતૃકાન્યાસવત્પ્રિયે ॥ ૨૦॥

સ્વરૈસ્તુ સહિતં સૂર્યં હૃદયાધઃ પ્રવિન્યસેત્ ।
બિન્દુસ્થાને સુધાસૂતિં યાદિવર્ણચતુષ્ટયૈઃ ॥ ૨૧॥

ભૂપુત્રં લોચનદ્વન્દ્વ કવર્ગાધિપતિં પ્રિયે ।
હૃદયે વિન્યસેચ્છુક્રં ચવર્ગાધિપતિં પુનઃ ॥ ૨૨॥

હૃદયોપરિ વિન્યસેટ્ટવર્ગાધિપતિં બુધમ્ ।
બૃહસ્પતિં કણ્ઠદેશે તવર્ગાધિપતિં પ્રિયે ॥ ૨૩॥

નાભૌ શનૈશ્ચરં દેવિ પવર્ગેશં સુરેશ્વરિ ।
વક્ત્રેશાદિચતુર્વર્ણૈઃ સહિતં રાહુમેવ ચ ॥ ૨૪॥

ક્ષકારસહિતં કેતું પાયો દેવેશિ વિન્યસેત્ ।
[ રક્તં શ્વેતં તથા રક્તં શ્યામં પીતં ચ પાણ્ડુરમ્ ।
કૃષ્ણં ધૂમ્રં ધૂમ્રધૂમ્રં ભાવયેદ્રવિપુર્વકાન્॥

કામરૂપધરાન્ દેવિ દિવ્યામ્બરવિભૂષણાન્ ।
વામોરુન્યસ્તહસ્તાંશ્ચ દક્ષહસ્તવરપ્રદાન્ ॥]

લલાટે દક્ષનેત્રે ચ વામે કર્ણદ્વયે પુનઃ ॥ ૨૫॥

પુટયોનિર્નાસિકાયાશ્ચ કણ્ઠે સ્કન્ધદ્વયે પુનઃ ।
પશ્ચાત્કૂર્પરયુગ્મે ચ મણિબન્ધદ્વયે પુનઃ ॥ ૨૬॥

સ્તનયોર્નાભિદેશે ચ કટિબન્ધે તતઃ પરમ્ ।
ઊરુયુગ્મે તથા જાન્વોર્જઙ્ઘયોશ્ચ પદદ્વયે ॥ ૨૭॥

[ આદ્યયુગ્મન્તથા ચૈકં તસ્ત્રીણિ ચતુષ્ટયમ્ ।
એકમેકં દ્વયઞ્ચેતિ સ્વરાઃ પ્રોક્તાશ્ચતુર્દશ ॥ ૨૮॥

વ્યઞ્જનેષ્વેકમુભયં દ્વયં ન્યસ્યેદતઃ પરમ્ ।
એકં યુગ્મં દ્વયન્દ્વન્દ્વમેકં યુગ્મં દ્વયન્તતઃ ॥ ૨૯॥

એકં ત્રયં તથા ચૈકં એકમેકં દ્વયન્તથા ।
એકં દ્વયં ત્રયં પશ્ચાલ્લક્ષં અં મશ્ચતુષ્ટયમ્ ॥ ૩૦॥

અશિન્યાદેઃ પુરો ભગે દત્વા ચક્રમતો ન્યસેત્ ]
જ્વલત્કાલાનલપ્રખ્યા વરદાભયપાણયઃ ॥ ૩૧॥

નતિપાણ્યોઽશ્વિનીપૂર્વાઃ સર્વાભરણભૂષિતાઃ ।
એતાસ્તુ વિન્યસેદ્દેવિ સ્થાનેષ્વેષુ સુરાર્ચિતે ॥ ૩૨॥

વિશુદ્ધૌ હૃદયે નાભૌ સ્વાધિષ્ટાને ચ મૂલકે ।
આજ્ઞાયાં ધાતુનાથાશ્ચ ન્યસ્તવ્યા ડાદિદેવતાઃ ॥ ૩૩॥

અમૃતાદિયુતાઃ સમ્યઙ્ન્યસ્તવ્યાશ્ચ સુરેશ્વરિ ।
પાદે લિઙ્ગે ચ કુક્ષૌ ચ હૃદયે બાહુમૂલયોઃ ॥ ૩૪॥

દક્ષિણં પાદમારભ્ય વામપાદાવસાનકમ્ ।
મેષાદિરાશયો વર્ણૈર્ન્યસ્તવ્યાઃ સહ પાર્વતિ ॥ ૩૫॥

[ ચતુષ્કં ત્રિતયં ત્રીણિ દ્વિતયં દ્વિતયં દ્વયમ્ ।
પઞ્ચકં પઞ્ચકં પઞ્ચ પઞ્ચક્તં પઞ્ચકં તતઃ॥

ચત્વારિ મેરુર્મિને સ્યુઃ કન્યાયાં પઞ્ચ શાદયઃ । ]
પિઠાનિ વિન્યસેદ્દેવિ માતૃકાસ્થાનકે પુનઃ ।
તેષાં નામાનિ વક્ષ્યન્તે શ◌ૃણુષ્વાવહિતા પ્રિયે ॥ ૩૬॥

કામરૂપં વારાણસી નેપાલં પૌણ્ડ્રવર્ધનમ્ ।
ચરસ્થિરં કાન્યકુબ્જં પૂર્ણશૈલં તથાર્બુદમ્ ॥ ૩૭॥

આમ્રાતકેશ્વરૈકામ્રં ત્રિસ્રોતઃ કામકોટકમ્ ।
કૈલાસં ભૃગુનગરં કેદારપૂર્ણચન્દ્રકે ॥ ૩૮॥

શ્રીપીઠમોઙ્કારપીઠં જાલન્ધ્રં માલવોત્કલે ।
કુલાન્તં દેવિકોટં ચ ગોકર્ણં મારુતેશ્વરમ્ ॥ ૩૯॥

અટ્ટહાસં ચ વિરજં રાજગેહં મહાપથમ્ ।
કોલાપુર મેલાપુરં ઓઙ્કારન્તુ જયન્તિકા ॥ ૪૦॥

ઉજ્જયિન્યાપિ ચિત્રા ચ ક્ષીરકં હસ્તિનાપુરમ્ ।
ઓડ્ડીશં ચ પ્રયાગાખ્યં ષષ્ઠં માયાપુરં તથા ॥ ૪૧॥

જલેશં મલયં શૈલં મેરું ગિરિવરં તથા ।
મહેન્દ્રં વામનં ચૈવ હિરણ્યપુરમેવ ચા ॥ ૪૨॥

મહાલક્ષ્મીપુરોડ્યાણં છાયાછત્રમતઃ પરમ્ ।
એતે પીઠાઃ સમુદ્દિષ્ટા માતૃકારૂપકાઃ સ્થિતાઃ ॥ ૪૩॥

એવં ષોઢા પુરઃ કૃત્વા શ્રીચક્રન્યાસમાચરેત્ ।
શ્રીમત્ત્રિપુરસુન્દર્યાશ્ચક્રન્યાસં શ‍ૃણુ પ્રિયે ॥ ૪૪॥

યન્ન કસ્યચિદાખ્યાતં તનુશુદ્ધિકરં પરમ્ ।
ચતુરસ્રાદ્યરેખાયૈ નમ ઇત્યાદિતો ન્યસેત્ ॥ ૪૫॥

દક્ષાંસપૃષ્ઠપાણ્યગ્રસ્ફિક્પાદાઙ્ગુલીષ્વથ ।
વામાઙ્ઘ્ર્યઙ્ગુલિષુસ્ફિક્કે પાણ્યગ્રે ચાંસપૃષ્ઠકે ॥ ૪૬॥

સચૂલીમૂલપૃષ્ઠેષુ વ્યાપકત્વેન સુન્દરિ ।
અત્રૈવ સ્થાનદશકે અણિમાદ્યાસ્તુ વિન્યસેત્ ॥ ૪૭॥

સિદ્ધિસ્તદન્તશ્ચ તનુવ્યાપકત્વેન સુન્દરિ ।
[ ચતુરસ્રમધ્યરેખાયૈ નમ ઇત્યપિ વલ્લભે। ]
તસ્યાઃ સ્થાનેષુ વિન્યસ્ય બ્રહ્માણ્યાદ્યાસ્તદાષ્ટસુ ॥ ૪૮॥

પાદાઙ્ગુષ્ઠદ્વયે પાર્શ્વે દક્ષે મૂર્ધન્યપાર્શ્વકે ।
વામદક્ષિણજાન્વોશ્ચ બહિરંસદ્વયે તથા ॥ ૪૯॥

ન્યસ્તવ્યાશ્ચતુરસ્રાન્ત્યરેખાયૈ નમ ઇત્યપિ ।
વિન્યસેદ્ વ્યાપકત્વેન પૂર્વોક્તાન્તશ્ચ વિગ્રહે ॥ ૫૦॥

તસ્યાઃ સ્થાનેષુ દશસુ મુદ્રાણાં દશકં ન્યસેત્ ।
બ્રહ્માણ્યાદ્યષ્ટસ્થાનાન્તસ્તાસામષ્ટૌ ન્યસેત્તતઃ ॥ ૫૧॥

શિષ્ટે દ્વે દ્વાદશાન્તે ચ પાદાઙ્ગુષ્ઠે ચ વિન્યસેત્ ।
તદાન્તઃ ષોડશદલપદ્માય નમ ઇત્યપિ ॥ ૫૨॥

વિન્યસ્ય તદ્દલે કામાકર્ષિણ્યાદ્યાશ્ચ વિન્યસેત્ ।
દલાનિ દક્ષિનશ્રોત્રપૃષ્ઠમંસં ચ કૂર્પરમ્ ॥ ૫૩॥

કરપૃષ્ઠં ચોરુજાનુગુલ્ફપાદતલં તથા ।
વામપાદતલાદ્યેવમેતદેવાષ્ટકં મતમ્ ॥ ૫૪॥

તદન્તરે ચાષ્ટદલપદ્માય નમ ઇત્યપિ ।
વિન્યસ્ય તદ્દલેષ્વેષુ દક્ષશઙ્ખે ચ જત્રુકે ॥ ૫૫॥

ઊર્વન્તર્ગુલ્ફગુલ્ફોરુજત્રુશઙ્ખે ચ વમતઃ ।
અનઙ્ગકુસુમાદ્યાશ્ચ શક્તીરષ્ટૌ ચ વિન્યસેત્ ॥ ૫૬
તદનતશ્ચતુર્દશારચક્રાય નમ ઇત્યપિ ।
વિન્યસ્ય તસ્ય કોણેષુ ન્યસેચ્છક્તીશ્ચતુર્દશ ॥ ૫૭॥

સર્વસઙ્ક્ષોભિણ્યાદ્યાસ્તુ તસ્ય કોણાનિ વચ્મ્યહમ્ ।
લલાટં દક્ષભાગં ચ દક્ષગણ્ડાંસમધ્યતઃ ॥ ૫૮॥

પાર્શ્વાન્તરૂરુકઙ્ઘાન્તર્વામજઙ્ઘાદિ પાર્વતિ ।
વામોર્વન્તં વામપાર્શ્વં વામાંસં વામગણ્ડકમ્ ॥ ૫૯॥

લલાટવામમધ્યે ચ તથા વૈ પૃષ્ઠમિત્યપિ ।
તતો દશારચક્રાય નમ ઇત્યપિ પાર્વતિ ॥ ૬૦॥

તસ્ય કોણાનિ દક્ષાક્ષિનાસામૂલાऽऽસ્યનેત્રકે ।
કુક્ષીશવાયુકોણેષુ જાનુદ્વયગુદેષુ ચ ॥ ૬૧॥

કુક્ષિનૈ ઋર્તિવહ્ન્યાખ્યકોણેષ્વેષુ ન્યસેત્ પુનઃ ।
સર્વાસિદ્ધિપ્રદાદીનાં શક્તીનાં દશકં તથા ॥ ૬૨॥

તદન્તસ્ય દશારાદિચક્રાય નમ ઇત્યપિ ।
વિન્યસ્ય તસ્ય કોણેષુ સર્વજ્ઞાદ્યાઃ પ્રવિન્યસેત્ ॥ ૬૩॥

દક્ષનાસા સૃક્કિણી ચા સ્તનં વૃષણમેવ ચ ।
સીવિની વામમુષ્કં ચ સ્તનં સૃક્કિણિ નાસિકે ॥ ૬૪॥

નાસાગ્રં ચૈવ વિજ્ઞેયં કોણાનાં દશકં તથા ।
તદન્તરષ્ટકોણાદિચક્રાય નમ ઇત્યપિ ॥ ૬૫॥

વિન્યસ્ય તસ્ય કોણેષુ વષિન્યાદ્યષ્ટકં ન્યસેત્ ।
ચિબુકં કણ્ઠહૃદયનાભીનાં ચૈવ દક્ષિણમ્ ॥ ૬૬॥

જ્ઞેયં પાર્શ્વચતુષ્કં ચ મણિપૂરાદિ વામકમ્ ।
ચતુષ્ટયં ચ પાર્શ્વાનામેતત્ કોણાષ્ટકં મતમ્ ॥ ૬૭॥

હૃદયસ્થત્રિકોણસ્ય ચતુર્દિક્ષુ બહિર્ન્યસેત્ ।
શરચાપૌ પાશસૃણી ત્રિકોણાય નમસ્તથા ॥ ૬૮॥

વિન્યસ્ય તસ્ય કોણેષુ અગ્રદક્ષોત્તરેષુ ચ ।
કામેશ્વર્યાદિદેવીનાં મધ્યે દેવીં ચ વિન્યસેત્ ॥ ૬૯॥

એવં મયોદિતો દેવિ ! ન્યાસો ગુહ્યતમક્રમઃ ।
એતદ્ ગુહ્યતમં કાર્યં ત્વયા વૈ વીરવન્દિતે ॥ ૭૦॥

સમયસ્થાય દાતવ્યં નઽશિષ્યાય કદાચન ।
ગુપ્તાદ્ ગુપ્તતરં ચૈતત્તવાઽદ્ય પ્રકટીકૃતમ્ ॥ ૭૧॥

મૂલદેવ્યાદિકં ન્યાસમણિમાન્તં પુનર્ન્યસેત્ ।
[ ત્રિકોણસ્થે મહાબિન્દૌ મહાત્રિપુરસુન્દરીમ્ ] ।
શિરસ્ત્રિકોણપૂર્વાદિ કામેશ્વર્યાદિકં ન્યસેત્ ॥ ૭૨॥

બાણાન્નેત્રે ભ્રુવોશ્ચાપૌ કર્ણે પાશદ્વયં ન્યસેત્ ।
સૃણિદ્વયં ચ નાસાગ્રે દક્ષિણાગ્રં તુ વિન્યસેત્ ॥ ૭૩॥

મુણ્ડમૂલક્રમેણૈવ ન્યસેદ્વાગ્દેવતાષ્ટકમ્ ।
બૈન્દવાદીનિ ચક્રાણિ ન્યસ્તવ્યાનિ વરાનને ॥ ૭૪॥

નેત્રમૂલે ત્વપાઙ્ગે ચ કર્ણપૂર્વોત્તરે પુનઃ ।
ચૂડાદિકણ્ઠનિમ્નેઽર્ધં શેષાર્ધં કર્ણપૃષ્ટકે ॥ ૭૫॥

કર્ણે પૂર્વે ત્વપાઙ્ગે ચ તસ્ય મૂલે ચ વિન્યસેત્ ।
હૃદયે મનુકોણસ્થ શક્તયોઽપિ ચ પૂર્વવત્ ॥ ૭૬॥

સર્વસિદ્ધ્યાદિકં કણ્ઠે પ્રાદક્ષિણ્યેન વિન્યસેત્ ।
નાભાવષ્ટદલં તત્તુ વંશે વામે ચ પાર્શ્વકે ॥ ૭૭॥

ઉદરે સવ્યપાર્શ્વે ચ ન્યસેદાદિચતુષ્ટયમ્ ।

વંશવામાન્તરાલાદિ ન્યસેદન્ય ચતુષ્ટયમ્ ॥ ૭૮॥

સ્વાધિષ્ઠાને ન્યસેત્ સ્વસ્ય પૂર્વાદ્દક્ષાવસાનકમ્ ।
ચતસ્રસ્તુ ચતસ્રસ્તુ ચતુર્દિક્ષુ ક્રમાન્ન્યસેત્ ॥ ૭૯॥

મૂલાધારે ન્યસેન્મુદ્રાદશકં સાધકોત્તમઃ ।
પુનર્વંશે ચ સવ્યે ચ વામે ચૈવાન્તરાલકે ॥ ૮૦॥

ઊર્ધ્વોધો દશમુદ્રાશ્ચ ઊર્ધ્વાધોવર્જિતં પુનઃ ।
બ્રહ્માણ્યાદ્યાષ્ટકં દક્ષજન્ઘાયાં તાસ્તુ પૂર્વવત્ ॥ ૮૧॥

વામજઙ્ઘાં સમારભ્ય વામાદિક્રમતોઽપિ ચ ।
સિદ્ધ્યષ્ટકં ન્યસેત્તેષુ દ્વયં પાદતલે ન્યસેત્ ॥ ૮૨॥

કારણાત્પ્રસૃતં ન્યાસં દીપાદ્દીપમિવોદિતમ્ ।
એવં વિન્યસ્ય દેવેશીં સ્વાભેદેન વિચિન્તયેત્ ॥ ૮૩॥

તતશ્ચ કરશુદ્ધ્યાદિન્યાસં કુર્યાત્ સમાહિતઃ ।
અહં તે કથયામ્યદ્ય વિદ્યાન્યાસં શ ૃનુ પ્રિયે ॥ ૮૪॥

મૂર્ધ્નિ ગુહ્યે ચ હૃદયે નેત્રેષુ ત્રિતયેષુ ચ ।
શ્રોત્રયોર્યુગલે ચૈવ મુખે ચ ભુજયોસ્તથા ॥ ૮૫॥

પૃષ્ટે જાન્વોશ્ચ નાભૌ ચ વિદ્યાન્યાસં વિધાય ચ ।
કરશુદ્ધિં પુનશ્ચૈવ આસનાદિષડઙ્ગકમ્ ॥ ૮૬॥

શ્રીકણ્ઠાદીનિ વાગ્દેવીરાધારે હૃદયે પુનઃ ।
શિખાયાં બૈન્દવસ્થાને ત્વગ્નિચક્રાદિકા ન્યસેત્ ॥ ૮૭॥

તત્ત્વત્રયં સમસ્તં ચ વિદ્યાબિજત્રયાન્વિતમ્ ।
પાદાદિનાભિપર્યન્તમાગલં શિરસ્તથા ॥ ૮૮॥

વ્યાપકં ચૈવ વિન્યસ્ય સ્વાત્મીકૃત્ય પરં પુનઃ ।
સન્તર્પયેત્ પુનર્દેવીં સૌમ્યાગ્નેયામૃતદ્રવૈઃ ॥ ૮૯॥

એવં ચતુર્વિધો ન્યાસઃ કર્વવ્યો વીરવન્દિતે ।
ષોઢાન્યાસોઽણિમાદ્યશ્ચ મૂલદેવ્યાદિકઃ પ્રિયે ॥ ૯૦॥

કરશુદ્ધ્યાદિકસ્યૈવ સાધકેન સુસિદ્ધયે ।
પ્રાતઃ કાલે તથા પૂજાસમયે હોમકર્મણિ ॥ ૯૧॥

જપકાલે તથા તેષાં વિનિયોગઃ પૃથક્ પૃથક્ ।
પૂજાકાલે સમસ્તં વા કૃત્વા સાધકપુઙ્ગવઃ ॥ ૯૨॥

ષટ્ત્રિંશતત્ત્વપર્યન્તમાસનં પરિકલ્પ્ય ચ ।
ગુપ્તાદિયોગિનીનાં ચ મન્ત્રેણાઽથ બલિં દદેત્ ॥ ૯૩॥

પિણ્ડઽરૂપપદગ્રન્થિભેદનાદ્ વિઘ્નભેદકમ્ ।
ગુહ્યહૃન્મુખમૂર્ધસુ વિદ્યાન્યાસનેઅ સુન્દરિ ॥ ૯૪॥

યાગમન્દિરગાંશ્ચૈવ વિઘ્નાનુત્સાર્ય મન્ત્રવિત્ ।
[ અપસર્પન્તુ તે ભૂતા યે ભુતા ભૂમિસંસ્થિતાઃ ॥

યે ભૂતા વિઘ્નકર્તારસ્તે નશ્યન્તુ શિવાજ્ઞયા ]
પાર્ષ્ણિઘાતેન ભૌમાંશ્ચ તાલેન ચ નભોગતાન્ ॥ ૯૫॥

અસ્ત્રમન્ત્રેણ વિદ્યાંશ્ચ દૃષ્ટ્યા વિઘાનપોહયેત્ ।
દિક્ષ્વધોર્ધ્વં મહાવહ્નિપ્રાકારં પરિભાવયેત્ ॥ ૯૬॥

સામાન્યાર્ઘ્યેણ દેવેશિ! માર્તણ્ડઽં પરિપૂજયેત્ ।
પ્રકાશશક્તિસહિતમરુણાકલ્પમુજ્જ્વલમ્ ॥ ૯૭॥

ગ્રહાદિપરિવારઞ્ચ વિશ્વતેજોઽવભાસનમ્ ।
સૌમ્યાગ્નેયયુતૈર્દેવિ રોચનાગુરુકુઙ્કુમૈઃ ॥ ૯૮॥

મૂલમુચ્ચારયન્ સમ્યગ્ભાવયેચ્ચક્રરાજકમ્ ।
યોગિની મૂલમન્ત્રેણ ક્ષિપેત્ પુષ્પાઞ્જલિં તતઃ ॥ ૯૯॥

મણિમુક્તાપ્રવાલૈર્વા વિલોમં મૂલવિદ્યયા ।
અશૂન્યં સર્વદા કુર્યાચ્છૂન્યે વિઘ્નાસ્ત્વનેકશઃ ॥ ૧૦૦॥

શ્રીચક્રસ્યાત્મનશ્ચૈવ મધ્યે ત્વર્ઘ્યં પ્રતિક્ષિપેત્ ।
ચતુરસ્રાન્તરાલસ્થકાણષટ્કે સુરેશ્વરિ ॥ ૧૦૧॥

ષડાસનાનિ સમ્પુજ્ય ત્રિકોણસ્યાન્તરે પુનઃ ।
પીઠાનિ ચતુરો દેવિ કાપૂજા ઓ ઇતિ ક્રમાત્ ॥ ૧૦૨॥

અર્ચયિત્વાઽર્ઘ્યપાદે તુ વહ્નેર્દશ કલા યજેત્ ।
અર્ઘ્યપાત્રં પ્રતિષ્ઠાપ્ય તત્ર સૂર્યકલા યજેત્ ॥ ૧૦૩॥

પાત્રે સૂર્યકલાશ્ચૈવ કભાદિદ્વાદશાર્ચયેત્ ।
વિધૃતે તુ પુનર્દ્રવ્યે ષોડશેન્દુકલા યજેત્ ॥ ૧૦૪॥

અમૃતેશીં ચ તન્મધ્યે ભાવયેચ્ચ નવાત્મના ।
નવાત્મના તતો દેવિ તર્પયેદ્ધાતુદેવતાઃ ॥ ૧૦૫॥

આનન્દભૈરવં વૌષડન્તેનૈવ ચ તર્પયેત્ ।
તદાજ્ઞાપ્રેરિતં તચ્ચ ગુરુષઙ્ક્તૌ નિવેદયેત્ ॥ ૧૦૬॥

તથૈવાર્ઘ્યં વિશેષેણ સાધયેત્ સાધકોત્તમઃ ।
ગુરુપાદાલિમાપૂજ્ય ભૈરવાય દદેત્ પુનઃ ॥ ૧૦૭॥

તદીયં શેષમાદાય કામાગ્નૌ વિશ્વ ... સ્થુષિ ।
પાદુકાં મૂલવિદ્યાં ચ જપન્ હોમં સમાચરેત્ ॥ ૧૦૮॥

મહાપ્રકાશે વિશ્વસ્ય સંહારવમનોદ્યતે ।
મરીચિવૃત્તીર્જુહુયાન્મનસા કુણ્ડલીમુખે ॥ ૧૦૯॥

અહન્તેદન્તયોરૈક્યમુન્મન્યાં સ્રુચિ કલ્પિતમ્ ।
મથનોદ્રેકસમ્ભૂતં વસ્તુરૂપં મહાહવિઃ ॥ ૧૧૦॥

હુત્વા હુત્વા સ્વયં ચૈવં મહજાનન્દવિગ્રહઃ ।
સ્વપ્રધાપ્રસરાકારં શ્રીચક્રં પૂજયેત્ સુધીઃ ॥ ૧૧૧॥

ગણેશં દૂતરીં ચૈવ ક્ષેત્રેશં દૂતિકાં તથા ।
બાહ્યદ્વારે યજેદ્ દેવિ દેવીશ્ચ સ્વસ્તિકાદિકાઃ ॥ ૧૧૨॥

તતસ્ચાન્તસ્ત્રિકોણઽપિ ગુરુપઙ્ક્તિં ત્રિધા સ્થિતામ્ ।
તદન્તશ્ચ મહાદેવીં તામાવાહ્ય યજેત્ પુનઃ ॥ ૧૧૩॥

મહાપદ્મવનાન્તસ્થાં કારણાનન્દવિગ્રહામ્ ।
મદઙ્ગોપાશ્રિતાં દેવીમિચ્છાકામફલપ્રદામ્ ॥ ૧૧૪॥

ભવતીં ત્વન્મયૈરેવ નૈવેદ્યાદિભિરર્ચયેત્ ।
ત્રિકોણે તત્સ્ફુરત્તાયાઃ પ્રતિબિમ્બાકૃતીઃ પુનઃ ॥ ૧૧૫॥

તત્તત્તિથિમયીર્નિત્યાઃ કામ્યકર્માનુસારિણીઃ ।
તત્ર પ્રકટયોગિન્યશ્ચક્રે ત્રૈલોક્યમોહને ॥ ૧૧૬॥

માતૃકાસ્થૂલરૂપત્વાત્ત્વગાદિવ્યાપકત્વતઃ ।
યોગિન્યઃ પ્રકટા જ્ઞેયાઃ સ્થૂલવિશ્વપ્રધાત્મનિ ॥ ૧૧૭॥

અણિમાદ્યા મહાદેવિ સિદ્ધયોઽષ્ટૌ વ્યવસ્થિતાઃ ।

તાસુ રક્તતરા બર્ણૈર્વરાભયકરાસ્તથા ॥ ૧૧૮॥

ધૃતચિન્તામહારત્ના મનીષિતફલપ્રદાઃ ।
બ્રાહ્મ્યાદ્યા અપિ તત્રૈવ યષ્ટવ્યાઃ ક્રમતઃ પ્રિયે ॥ ૧૧૯॥

બ્રહ્માણી પીતવર્ણા ચ ચતુર્ભિઃ શોભિતા મુખૈઃ ।
વરદાઽભયહસ્તા ચ કુણ્ડિકા ક્ષલસત્કરા ॥ ૧૨૦॥

માહેશ્વરી શ્વેતવર્ણા ત્રિનેત્રા શૂલધારિણી ।
કપાલમેણં પરશું દધાના પાણિભિઃ પ્રિયે ॥ ૧૨૧॥

[ ઐન્દ્રી તુ શ્યામવર્ણા ચ વ્રજોત્પલલસત્કરા ]
કૌમારી પીતવર્ણા ચ શક્તિતોમરધરિણી ॥ ૧૨૨॥

વરદાભયહસ્તા ચ ધ્યાતવ્યા પરમેશ્વરી ।
વૈષ્ણવી શ્યામવર્ણા ચ શઙ્ખચક્રવરાભયાન્ ॥ ૧૨૩॥

હસ્તપદ્મૈસ્તુ વિભ્રાણા ભૂષિતા દિવ્યભૂષણૈઃ ।
વારાહી શ્યામલચ્છાયા પોત્રિ વક્ત્રસમુજ્જ્વલા ॥ ૧૨૪॥

હલં ચ મુસલં ખડ્ગં ખેટકં દધાતી ભુજૈઃ ।
[ ઐન્દ્રી શ્યામલવર્ણા ચ વજદ્વયલસત્કરા ] ॥ ૧૨૫॥

ચામુણ્ડા કૃષ્ણવર્ણા ચ શૂલં ડમરુકં તથા ।
ખડ્ગં વેતાલકં ચૈવ દધાના દક્ષિણૈઃ કરૈઃ ॥ ૧૨૬॥

નાગખેટકઘણ્ટા ખ્યાન્ દધાનાન્યૈઃ કપાલકમ્ ।
મહાલક્ષ્મીસ્તુ પીતાભા પદ્મદર્પણમેવ ચ ॥ ૧૨૭॥

માત લુઙ્ગફલં ચૈવ દધાન પરમેશ્વરી ।
એવં ધ્યાત્વા યજેદેતાશ્ચક્રેશીં ત્રિપુરાં તતઃ ॥ ૧૨૮॥

કર્મેન્દ્રિયાણાં વૈમલ્યાત્ કરશુદ્ધિકરી સ્મૃતા ।
કાયશુદ્ધિભવા સિદ્ધિરણિમા ચાત્ર સંસ્થિતા ॥ ૧૨૯॥

ષોડશસ્પન્દસન્દોહે ચમત્કૃતિમયોઃ કલાઃ ।
પ્રાણાદિષોડશાનાં તુ વયુના પ્રાણનાત્મિકાઃ ॥ ૧૩૦॥

બીજ ભૂતાઃ સ્વરાત્મત્વાત્ કલનાદ્ બીજરૂપકાઃ ।
અન્તરઙ્ગતયા ગુપ્તા યોગિન્યઃ સંવ્યવસ્થિતાઃ ॥ ૧૩૧॥

કામાકર્ષણરૂપાદ્યાઃ સૃષ્ટેઃ પ્રાધાન્યતઃ પ્રિયે ।
સર્વાશાપૂરણાખ્યે તુ ચક્રે વામેન પૂજયેત્ ॥ ૧૩૨॥

પાશાङ્કુશધરા હ્યેતા રક્તા રક્તામ્બરા વૃતાઃ ।
પ્રાણશુદ્ધિમયી સિદ્ધિર્લઘિમા ભોક્તુરાત્મનઃ ॥ ૧૩૩॥

ત્રિપુરેશી ચ ચક્રેશી પૂજ્યા સર્વોપચારકૈઃ ।
[ કૌલિકાનુભવાવિષ્ટભોગપુર્યષ્ટકાશ્રિતાઃ ॥ ૧૩૪॥

વાગ્ભવાષ્ટકસમ્બન્ધસૂક્ષ્મા વર્ગસ્વરૂપતઃ ।
તાસ્તુ ગુપ્તતરાઃ સર્વાઃ સર્વસંક્ષોભણાત્મકે ॥ ૧૩૫॥

અનઙ્ગકુસુમાદ્યાસ્તુ રક્તકઞ્ચુકશોભિતાઃ ]
[ વેણીકૃત લસત્કેશાશ્ચાપબાણધરાઃ શુભાઃ ] ॥ ૧૩૬॥

તત્તદાજારબુદ્ધ્યાત્મબોગ્યભોક્તુર્મહેશિતુઃ ।
પિણ્ડાદિપદવિશ્રાન્તિસૌન્દર્યગુણસંયુતા ॥ ૧૩૭॥

ચક્રેશ્વરી બુદ્ધિશુદ્ધિરૂપા ચ પરમેશ્વરી ।
મહિમાસિદ્ધિરૂપા તુ પૂજ્યા સર્વોપચારકૈઃ ॥ ૧૩૮॥

દ્વાદશગ્રન્થિભેદેન સમુલ્લસિતસંવિદઃ ।
વિસર્ગાન્તદશવેશાચ્છાક્તાનુભવપૂર્વકમ્ ॥ ૧૩૯॥

ઉન્મેષષક્તિપ્રસરઈરિચ્છાશક્તિપ્રધાનકૈઃ ।
તદેવાઽકુલસઙ્ઘટ્ટરૂપૈર્વર્ણચતુષ્ટયૈઃ ॥ ૧૪૦॥

વેદ્યોષ્મરૂપસાવર્ણૈર્મિશ્રેચ્છાભાવિતૈરપિ ।
કુલશક્તિસમાવેશરૂપવર્ણદ્વયાન્વિતૈઃ ॥ ૧૪૧॥

શક્તેઃ સારમયત્વેન પ્રસૃતત્વાન્મહેશ્વરિ ।
સ,પ્રદાયક્રમાયાતાશ્ચક્રે સૌભાગ્યદાયકે ॥ ૧૪૨॥

નિરન્તરઓરધા રૂપસૌભાગ્યં કલયોગતઃ ।
અન્તર્થસંજ્ઞિકે દેવિ અણિમાસદૃશાઃ શુભાઃ ॥ ૧૪૩॥

સર્વસક્ષોભિણીપૂર્વા દેહાક્ષાદિવિશુદ્ધિદાઃ ।
ઈશિત્વસિદ્ધિરપિ ચ પ્રોતરૂપે પુરત્રયે ॥ ૧૪૪॥

યોગાદિક્લેશભેદેન સિદ્ધા ત્રિપુરવાસિનીઇ ।
એતાઃ સમ્પૂજયેદ્ દેવિ સર્વાઃ સર્વોપચારકૈઃ ॥ ૧૪૫॥

સદાતનાના નાદાનાં નવરન્ધ્રસ્થિતાત્મનામ્ ।
મહાસામાન્યરૂપેણ વ્યાવૃત્તધ્વનિરૂપિણીઇ ॥ ૧૪૬॥

અસ્થિરસ્થિરવેદ્યાનાં છાયારૂપૈર્દશાર્ણકૈઃ ।
કુલકૌલિકયોગિન્યઃ સર્વસિદ્ધિપ્રદાયિકાઃ ॥ ૧૪૭॥

શ્વેતામ્બ્રધરાઃ શ્વેતાઃ શ્વેતાભરણભૂષિતાઃ ।
મન્ત્રાણાં સ્વપ્રધારૂપયોગાદન્વર્થસંજ્ઞકે ॥ ૧૪૮॥

સર્વસિદ્ધિપ્રદાદ્યાસ્તુ ચક્રે સર્વર્થસાધકે ।
લોકત્રયસમૃદ્ધીનાં હેતુત્વાચ્ચક્રનાયિકા ॥ ૧૪૯॥

ત્રિપુરા શ્રીર્મહેશાનિ મન્ત્રશુદ્ધિભવા પુનઃ ।
વશિત્વસિદ્ધિરાખ્યાતા એતાઃ સર્વાખ઼્ સમર્ચયેત્ ॥ ૧૫૦॥

ઊર્ધ્વાધોમુખયા દેવિ કુણ્ડલિન્યા પ્રકાશિતાઃ ।
કુલેચ્છયા બહિર્ભાવાત્ કાદિવર્ણપ્રથામયી ॥ ૧૫૧॥

નિગર્ભયોગિનીવાચ્યાઃ સ્વરૂપાવેશરૂપકે ।
સર્વાવેશકર ચક્રે સર્વરક્ષાકરે પરાઃ ॥ ૧૫૨॥

સર્વજ્ઞાદ્યાઃ સ્થિતા એતાઃ સહ પુસ્તાક્ષમાલિકાઃ ।
માતૃમાનપ્રમેયાણાં પુરાણાં પરિપોષિણી ॥ ૧૫૩॥

ત્રિપુરામાલિની ખ્યાતા ચક્રેશી ત્રિપુરમોહિની ।
નિરૂદ્ધવાયુસઙ્ઘટ્ટસ્ફટિતગ્રન્થિમૂલતઃ ॥ ૧૫૪॥

હૃદયાન્તરસંવિત્તિશૂન્યપર્યષ્ટકાત્મના ।
બીજરૂપસ્વરકલાસ્પૃષ્ટવર્ગાનુસારતઃ ॥ ૧૫૫॥

રહ્સ્યયોગિનીર્દેવીઃ સંસારદલનોજ્જ્વલે ।
સર્વરોગહરે ચક્રે સંસ્થિતા વીરવન્દિતે ॥ ૧૫૬॥

વશિન્યાદ્યા રક્તવર્ણા વરદાભયમુદ્રિતાઃ ।
પુસ્તકં જપમાલાં ચ દધાનાઃ સિદ્ધયોગિનીઃ ॥ ૧૫૭॥

શુદ્ધિવિદ્યાવિશુદ્ધિં ચ ભુક્તિસિદ્ધિં મહેશ્વરિ ।
ઈશ્વરીં ત્રિપુરાં સિદ્ધાં પૂજયેદ્ બિન્દુતર્પણૈઃ ॥ ૧૫૮॥

શક્તિત્રયાત્મિકા દેવિ ચિદ્ધામપ્રસરાઃ પુનાઃ ।

સંવર્તાગ્નિકલારૂપાઃ પરમાતિરહસ્યકાઃ ॥ ૧૫૯॥

પૂર્ણાપુર્ણસ્વરૂપાયાઃ સિદ્ધેર્હેતુઃ સુરેશ્વરિ ।
સર્વાસિદ્ધિમયાખ્યે તુ ચક્રે ત્વાયુધભૂષિતાઃ ॥ ૧૬૦॥

સ્થિતાઃ કામેશ્વરીપૂર્વાશ્ચતસ્રઃ પીઠદેવતાઃ ।
આયુધાસ્ત્વતિરક્તાભાઃ સ્વાયુધોજ્જ્વલમસ્તકાઃ ॥ ૧૬૧॥

વરદાભયહસ્તાશ્ચ પૂજ્યા વ્રતફલપ્રદાઃ઼ઃ ।
ત્વદીયાશ્ચ મદીયાશ્ચ પુંસ્ત્રિવશ્યવિધાયિનઃ ॥ ૧૬૨॥

ત્વગસૃઙ્માંસમેદોસ્થિશુક્લાનાં ચ મહેશ્વરિ ।
દ્વિતીયસ્વરસંયુક્તા એતે બાણાસ્ત્વદીયકાઃ ॥ ૧૬૩॥

વામાદીનાં પુરાણાં તુ જનની ત્રિપુર્મ્બિકા ।
પરસ્વાતન્ત્ર્યરૂપત્વાદિચ્છાસિદ્ધિર્મહેશ્વરિ ॥ ૧૬૪॥

એતાઃ સર્વોપચારેણ પૂજયેત્તુ વરાનને ।
સર્વાનન્દમયે દેવિ પરબ્રહ્માત્મકે પરે ॥ ૧૬૫॥

ચક્રે સંવિત્તિરૂપા ચ મહાત્રિપુરસુન્દરી ।
સ્વૈરાચારેણ સમ્પૂજ્યા ત્વહન્તેદન્તયોઃ સમ ॥ ૧૬૬॥

મહાકામકલારૂપા પીઠવિદ્યાદિસિદ્ધિદા ।
મહામુદ્રામયી દેવિ પૂજ્યા પઞ્ચદશાત્મિકા ॥ ૧૬૭॥

તત્તત્તિથિમયી નિત્યા નવમી ભૈરવી પરા ।
પ્રતિચક્રં સમુદ્રાસ્તુ ચક્રસઙ્કેતચોદિતાઃ ॥ ૧૬૮॥

નિત્યક્લિન્નાદિકાશ્ચૈવ કામ્યકર્માનુસારતઃ ।
ચતુરસ્રાન્તરાલે વા ત્રિકોણે વા યજેત્ સુધીઃ ॥ ૧૬૯॥

અલિના પિશિતૈર્ગન્ધૈર્ધૂપૈરારાધ્ય દેવતાઃ ।
ચક્રપૂજાં વિધાએત્થં કુલદીપં નિવેદયેત્ ॥ ૧૭૦॥

અન્તર્બહિર્ભાસમાનં સ્વપ્રકાશોજ્જ્વલં પ્રિયે ।
પુષ્પાઞ્જલિં તતઃ કૃત્વા જપં કુર્યાત્ સમાહિતઃ ॥ ૧૭૧॥

કૂટત્રયે મહાદેવિ કુણ્ડલીત્રિતયેઽપિ ચ ।
ચક્રાણાં પૂર્વપૂર્વેષાં નાદરૂપેણ યોજિતામ્ ॥ ૧૭૨॥

તેષુ પ્રાણાગ્નિમાયાર્ણકલાબિન્દ્વર્ધચન્દ્રિકાઃ ।
રોધિનીનાદનાદાન્તાઃ શક્તિવ્યાપિકલાન્વિતાઃ ॥ ૧૭૩॥

સમના ચોન્મના ચેતિ દ્વાદશન્તે સ્થિતાઃ પ્રિયે ।
મૂલકુણ્ડલિનીરૂપે મધ્યમે ચ તતઃ પુનઃ ॥ ૧૭૪॥

સૃષ્ટ્યુન્મુખે ચ વિશ્વસ્ય સ્થિતિરૂપે મહેશ્વરિ ।
કેવલં નાદરૂપેણ ઉત્તરોત્તરયોજિતમ્ ॥ ૧૭૫॥

શબલાકારકે દેવિ તૃતીયે દ્વાદશી કલા ।
શૂન્યષટ્કં તથા દેવિ હ્યવસ્થાપઞ્ચકં પુનઃ ॥ ૧૭૬॥

વિષુવં સપ્તરૂપં ચ ભાવયન્ મનસા જપેત્ ।
અગ્ન્યાદિદ્વાદશાન્તેષુ ત્રીંસ્ત્રીન્ ત્યક્ત્વા વરાનને ॥ ૧૭૭॥

શૂન્યત્રયં વિજાનીયાદેકૈકાન્તરતઃ પ્રિયે ।
[ શુન્યત્રયાત્ પરે સ્થાને મહાશૂન્યં વિભાવયેત્ ]
પ્રબોધ કરણસ્યાઽથ જાગરત્વેન ભાવનમ્ ॥ ૧૭૮॥

વહ્નૌ દેવિ મહાજાગ્રદવસ્થા ત્વિન્દ્રિયદ્વયૈઃ ।
આન્તરૈઃ કરણૈરેવ સ્વપ્નમાયાવબોધકઃ ॥ ૧૭૯॥

ગલદેશે સુષુપ્તિસ્તુ લીનપૂર્વસ્ય વેદનમ્ ।
અન્તઃકરણવૃઓત્તીનાં લયતો વિષયસ્ય તુ ॥ ૧૮૦॥

પૂર્વાર્ણાનાં વિલોમેન ભ્રૂમધ્યે બિન્દુસંસ્થિતા ।
તુર્યરૂપં તથા ચાત્ર વૃત્તાર્ધાદિસ્તુ સઙ્ગ્રહઃ ॥ ૧૮૧॥

ચૈતન્યવ્યક્તિહેતોસ્તુ નાદરૂપસ્ય વેદનમ્ ।
તુર્યાતીતં સુખસ્થાનં નાદાન્તાદિસ્થિતં પ્રિયે ॥ ૧૮૨॥

અત્રૈવ જપકાલે તુ પઞ્ચાવસ્થાઃ સ્મરેદ્ બુધઃ ।
યોગઃ પ્રાણાત્મમનસાં વિષુવં પ્રાણસંજ્ઞિતમ્ ॥ ૧૮૩॥

આધારિત્થિતનાદે તુ લીનં બુદ્ધ્યાત્મરૂપકમ્ ।
સંયોગેન વિયોગેન મન્ત્રાર્ણાનાં મહેશ્વરિ ॥ ૧૮૪॥

અનહતાદ્યાધારાન્તં નાદાત્મત્વવિચિન્તનમ્ ।
નાદસંસ્પર્શનાત્તસ્ય નાડીવિષુવમુચ્યતે ॥ ૧૮૫॥

દ્વાદશગ્રન્થિભેદેન વર્ણાનામન્તરે પ્રિયે ।

નાદયોગઃ પ્રશાન્તં તુ પ્રશાન્તેન્દ્રિયગોચરમ્ ॥ ૧૮૬॥

વહ્નિં માયાં કલાં ચૈવ ચેતનામર્ધચન્દ્રકમ્ ।
રોધિનીનાદનાદાન્તાન્ શક્તૌ લીનાન્ વિભાવયેત્ ॥ ૧૮૭॥

વિષુવં શક્તિસંજ્ઞં તુ તદુર્ધ્વં નાદચિન્તનમ્ ।
તદુર્ધ્વં કાલવિષુવમુન્મનાન્તં મહેશ્વરિ ॥ ૧૮૮॥

મુનિચન્દ્રાઽષ્ટદશભિસ્ત્રુટિભિર્નાદવેદનમ્ ।
ચૈતન્યવ્યક્તિહેતુશ્ચ વિષુવં તત્ત્વસંજ્ઞિતમ્ ॥ ૧૮૯॥

પરં સ્થાનં મહાદેવિ નિસર્ગાનન્દસુન્દરમ્ ।
એવં ચિતયમાનસ્ય જપકાલેષુ પાર્વતિ ॥ ૧૯૦॥

સિદ્ધયઃ સકલાસ્તૂર્ણાં સિદ્ધ્યન્તિ ત્વત્પ્રસાદતઃ ।
એવં કૃત્વા જપં દેવ્યા વામહસ્તે નિવેદયેત્ ॥ ૧૯૧॥

અનામાઙ્ગુષ્ઠયોગેન તર્પયેચ્ચક્રદેવતાઃ ।
મદ્યં માંસં તથા મત્સ્યં દેવ્યાસ્તુ વિનિવેદયેત્ ॥ ૧૯૨॥

કૌલાચારસમાયુક્તૈર્વિરૈર્સ્તુ સહ પૂજયેત્ ।
પુષ્યભેન તુ વારે ચ સૌરે ચ પરમેશ્વરિ ॥ ૧૯૩॥

ગુરોર્દિને સ્વનક્ષત્રે ચતુર્દશ્યષ્ટમીષુ ચ ।
ચક્રપૂજાં વિશેષેણ યોગિનીનાં સમાચરેત્ ॥ ૧૯૪॥

ચતુઃષષ્ટિયુતાઃ કોટ્યો યોગિનીનાં મહૌજસામ્ ।
ચક્રમેતત્ સમાશ્રિત્ય સંસ્થિતા વીરવન્દિતે ॥ ૧૯૫॥

અષ્ટાષ્ટકં તુ કર્તવ્યં વિત્તશાઠ્યવિવર્જિતમ્ ।
ત્વમેવ તાસાં રૂપેણ ક્રીડસે વિશ્વમોહિની ॥ ૧૯૬॥

અજ્ઞાત્વ તુ કુલાચારમયષ્ટ્વા ગુરુપાદુકામ્ ।
યોઽસ્મિન્ શાસ્ત્રે પ્રવર્તેત તં ત્વં પીડયસિ ધ્રુવમ્ ॥ ૧૯૭॥

એવં જ્ઞાત્વા વરારોહે કૌલાચારપરઃ સદા ।
આવયોઃ શબલાકારં મદ્યં તત્ર નિવેદ્ય ચ ॥ ૧૯૮॥

ત્વત્પ્રધા પ્રસરાકારાસ્ત્વામેવ પરિભાવયેત્ ।
વામિચ્છાવિગ્રહાં દેવીં ગુરુરૂપાં વિભાવયેત્ ॥ ૧૯૯॥

ત્વન્મયસ્ય ગુરોઃ શેષં નિવેદ્યાત્મનિ યોજયેત્ ।
યોગિનીનાં મહાદેવિ બટુકાયાત્મરૂપિણે ॥ ૨૦૦॥

ક્ષેત્રાણાં પતયે મદ્યં બલિં કુર્વિત હેતુના ।
નિત્યં પિબન્ વમન્ ખાદન્ સ્વેચ્છાચારપરઃ સ્વયમ્ ॥ ૨૦૧॥

અહન્તેદન્તયોરૈક્યં ભાવયન્ વિહરેત્ સુખમ્ ।
એતત્તે કથિતં સર્વં સઙ્કેતત્રયમુત્તમમ્ ॥ ૨૦૨॥

ગોપનીયં પ્રયત્નેન સ્વગુહ્યમિવ સુવ્રતે ।
ચુમ્બકે જ્ઞાનલુબ્ધે ચ ન પ્રકાશ્યં ત્વયાનઘે ॥ ૨૦૩॥

અન્યાયેન ન દાતવ્યં નાસ્તિકાનાં મહેશ્વરિ ।
એવં ત્વયાઽહમાજ્ઞપ્તો મદિચ્છારૂપયા પ્રભો ॥ ૨૦૪॥

અજ્ઞાનેન તુ યો દદ્યાત્ સ પરેતો ભવિષ્યતિ ।
સઙ્કેતં યો વિજાનાતિ યોગિનીનાં ભવેત્પ્રિયઃ ॥ ૨૦૫॥

સર્વેપ્સિતફલાવાપ્તિઃ સર્વકામફલાશ્રયઃ ।
યતોઽપિ દૃશ્યતે દેવિ કથં વિદ્વાન્ન ચિન્તયેત્ ॥ ૨૦૬॥

ઇતિ તૃતીયઃ પટલઃ સમાપ્તઃ ।

॥ ઇતિ યોગિનીહૃદયં સ્તોત્રમ્ ॥

Encoded and proofread by Mike Magee
(ac70@cityscape.co.uk mike.magee@btinternet.com) .

*YoginihRidayam*
pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*